मी॰ न्यौ
१२

कथो तो त्वाश्विनग्रहणानन्तरं सवनीयो विहित इति साद्यस्क्रे आश्विनग्रहणे कृते सवनी
यपशोरुपस्थितो भवतीति युक्तं तस्य स्थाने प्रथममनुष्ठानमितरयोस्तु पश्चादिति यु
क्तम्॥ प्रधानक्रमेण योऽङ्गानां क्रमः समुख्यः क्रमः॥ येन हि क्रमेण प्रधानानि क्रियन्ते ते
नैव क्रमेण तेषामङ्गानि अनुष्ठीयन्ते॥ तदा सर्वेषामङ्गानां स्वैः प्रधानैस्तुल्यं व्यव
धानं भवति॥ व्युत्क्रमेणानुष्ठाने केषांचिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानं केषां
४८ चिदत्यन्तं व्यवधानं स्यात्॥ तच्चायुक्तं प्रयोगविध्यवगतसाहित्यबाधापत्तेः अतः प्रधानक्र
मोऽप्यङ्गक्रमे हेतुः॥ अतएव प्रयाजशेषेणादावाग्नेयहविषोऽभिघारणं पश्चाद्दैन्द्रस्य
दध्नः॥ आग्नेयैन्द्रयागयोः पौर्वापर्यात्॥ एवं च द्वयोरभिघारणयोः स्वस्वप्रधानेन तु
ल्यमेकान्तरितत्वं व्यवधानम्॥ व्युत्क्रमे त्वभिघारणे त्वाग्नेयहविरभिघारणाग्नेययाग

॥ऽनुबंध्यानां सवनीयादीनां सहानुष्ठाने कर्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः
पश्चात् तस्मिंश्च देश आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममनुष्ठीयते॥ तथाहि
ज्योतिष्टोमे त्रयः पशुयागाः अग्नीषोमीयः सवनीय अनुबंध्यश्चेति तेषु भिन्नदे
शाः अग्नीषोमीय औपवसथ्येऽन्हि सवनीयः सुत्याकाले॥ अनुबंध्यस्त्वन्ते साद्य
स्क्रो नाम सोमयागविशेषः स चाप्यन्के ज्योतिष्टोमविकारोऽतस्तत्र त्रयोऽपि पशुयागाः
साद्यस्के चोदकप्राप्तास्तेषां च तत्र साहित्यं श्रुतं सह पशूनालभेत इति॥ तत्र साहित्ये
सवनीयदेशोऽत्र स्यप्रधानप्रत्यासत्तेः स्थानातिक्रमसाम्याच्च सवनीयदेशे सहानुष्ठानेऽग्नी
षोमीयानुबंध्ययोः स्वस्वस्थानातिक्रमः॥ अग्नीषोमीयदेशेऽनुबंध्यदेशे वा अनुष्ठाने त्रयाणां
स्वस्वस्थानातिक्रमः॥ तथा च प्रकृतावाश्विनग्रहं कृत्वा त्रिवृता यूपं परिवीय सवनीयं पशुमुपा

सर्वे पूर्वमनुष्ठीयेरन्। तत आग्नेयानुष्ठानं ततः सान्नाय्यानुष्ठानम्। तदा त्वाग्नेयस्य प्रधा-
नेन सह द्वाभ्यामाग्नेयप्रधानयोर्मध्ये ऽनुष्ठानाभ्यां विप्रकर्षः स्यात्॥ यदा तु सान्नाय्यधर्माणां
केषांचिदनुष्ठानानन्तरं सर्वेषु मुख्यक्रममाश्रित्याग्नेयधर्मानुष्ठानानन्तरमनुष्ठी-
यन्ते तदा सर्वेषामाग्नेयधर्माणां सान्नाय्यधर्माणां चैकैकेन विजातीयेन व्यव-
धानं भवति॥ आग्नेयधर्माणां स्वप्रधानेन सह सान्नाय्यधर्मैर्व्यवधानात् सान्नाय्य-
धर्माणां च स्वप्रधानेन सहाग्नेयानुष्ठानेन व्यवधानादिति न विप्रकर्षः। तस्मान्मुख्यक्रमः
प्रवृत्तिक्रमाद्बलवान्। सहप्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्यानुष्ठा-
ने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः स प्रवृत्तिक्रमः। यथा
प्राजापत्यपश्वङ्गेषु प्राजापत्यान्हि वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्तीति वाक्येन तृतीया-
निर्दिष्टानां सति कर्तव्यताकारादिकालस्त्वेन विहित [illegible] अतस्तेषामङ्गानां चोपाकरणानि

योरत्यन्तमप्रधाने ऐन्द्रदध्यभिघारणेन्द्रयागयोर्दर्शेतरितेऽप्रधानम्॥ तत्त्वायुक्त
मित्युक्तमेवमस्य च मुख्यक्रमः॥ पाठक्रमाद्दुर्बलः मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्र
मप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः॥ पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रम
मात्रसापेक्षतया न तथेति बलवान्॥ अत एवाग्नेयोपांशुयाजाग्नीषोमीयानां क्रमे
णानुष्ठीयमानानामप्युपांशुयाजस्य निर्वापो मुख्यक्रमानपेक्षमनुष्ठीयते॥ तस्य
दुर्बलत्वात् पाठक्रमात्तु पश्चादनुष्ठीयते तस्य प्रबलत्वादिति॥ स्थानापि मुख्यक्रमः प्रवृ
त्तिक्रमाद्बलवान्॥ प्रवृत्तिक्रमे ह्याग्नीषोमीयमालेव बहूनामङ्गानां प्रधानविप्रकर्षो भवति
अस्मिंश्चाग्नीषोमीयमालेषु सन्निकर्षः॥ तथा हि दर्शपूर्णमासयोः सहाग्नेयानुष्ठाने
नतः सान्नाय्यस्य तदेमाग्ने[illegible] मनुष्ठीयते न त्वग्नेः[illegible] मित्यतश्च प्रवृत्तिक्रमः॥

कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते . एवमहरहः संध्यामुपासीतेत्यादिना
श्रुतिविहितकालजीविनः संध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते॰
तच्च फलस्वाम्यं तस्यैव योऽधिकारविशिष्टः अधिकारित्वं च यद्विधिवाक्ये पुरुष
विशेषणत्वेन श्रूयते यथा काम्यकर्मणि फलकामना नैमित्तिके कर्मणि निमित्त
निश्चयः नित्ये संध्योपासनादौ श्रुतिविहितकालजीवित्वम्॥ अत एव राजसूयेन
3 स्वाराज्यकामो यजेतेत्यनेन विधिवाक्येन राजा स्वाराज्यमुद्दिश्य विदधानत्वेन
स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते किन्तु राज्ञः सतः स्वाराज्यकामस्यैव.
राजत्वस्याप्यधिकारिविशेषणत्वेनाश्रवणात् केचित्तु पुरुषविशेषणत्वेनाश्रुत
मप्यधिकारिविशेषणम्॥ यथाध्ययनविधिसिद्धविद्याक्रतुविधीनामर्थज्ञाना
पेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवत्त्वमप्यवगतेः एवमग्निसाध्यकर्म

योजनप्रभृतीनां साहित्यसंपादनं । तत्र प्राजापत्यपशूनां संप्रतिपन्नदेवताकत्वेन युगप
दनुष्ठानादुपपद्यते । तेषां तासां चोपाकरणादीनां युगपदनुष्ठानमशक्यम् । अतस्ते
षां साहित्यमव्यवहितानुष्ठानात्संपाद्यं तच्च एकस्योपाकरणं विधायापरस्योपाकरणेन
विधेयम् ।। एवं नियोजनादिकमपि । तथा च प्राजापत्येषु कस्माच्चित्पशोरारभ्य एकैकस
र्वत्रानुष्ठाय द्वितीयादिपदार्थस्तेनैव क्रमेणानुष्ठेयः । स प्रवृत्तिक्रमः सोऽयं मुख्यादि
भ्यो दुर्बलः । तदेवं संक्षेपतो निरूपितमङ्गविधिप्रक्रमनिरूपणेन प्रयोगविधिः । कर्मजन्य
फलस्वाम्यबोधको विधिरधिकारविधिः । कर्मजन्यफलस्वाम्यं कर्मजन्यफलभोक्तृत्वम् ।
स च यजेत स्वर्गकाम इत्यादिरूपः । स्वर्गमुद्दिश्य यागं विदधतानेन स्वर्गकामस्य याग
जन्यफलभोक्तृत्वं प्रतिपाद्यते । यस्याहिताग्नेरग्निर्गृहान् दहेत् सोऽग्नये क्षामवतेऽ
ष्टाकपालं निर्वपेदित्यादिनाऽग्निदाहादौ निमित्ते कर्मविधिं विदधता निमित्तवतः

विधानात्· पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः यथा व्रीहीनवहन्तीत्यादि कथमस्य
पक्षेऽप्राप्तप्रापकत्वमिति चेत् इत्थं अनेन हि अवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते
अन्वयव्यतिरेकसिद्धत्वात् किन्तु नियमः स चाप्राप्तांशपूरणं वैतुष्यस्य हि नानो
पायसाध्यत्वादवघातपरित्यागेनोपायान्तरं गृहीतुमारभ्यते यदा तदावघातस्याप्रा
प्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेन विधिना क्रियते ॥ अतश्चानियमवि
धावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेऽप्राप्तावघातविधानमिति
यावत्· उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः । यथा पं
च पंचनखा भक्ष्या इति इदं हि वाक्यं न पंचनखभक्षणपरं तस्य रागतः प्राप्तत्वात् ।
नापि नियमपरं पंचनखापंचनखभक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्यभावात् ॥ अतइ
दमपंचनखपंचनखभक्षणनिवृत्तिपरमिति परिसंख्याविधिः सा च द्विविधा श्रौती ला

सु साधनसिद्धः ऽग्निमन्त्राऽग्निसाध्यकर्मणो भाग्निसापेक्षत्वेन तद्विधीनामाधानसिद्धाग्नि
मन्त्रप्रत्येयप्रवृत्तेः एवं सामर्थ्यमपि आख्यातानामर्थं ब्रुवतां शक्तिस्तु सहकारिणीति न्या
यात् समर्थप्रसेवविधेः प्रवृत्तेः तदेवं निरूपितो विधिः प्रयोगसमवेतार्थस्मारकाश्च मं
त्राः तेषां च तादृशार्थस्मारकत्वेनैवार्थवत्वं ननु न दृष्टेन रणमदृष्टार्थमू ॥ संभवति दृ
ष्टफलकत्वे ऽदृष्टकल्पनाया अन्याय्यत्वात् न च दृष्टस्यार्थस्मरणस्य प्रकारान्त
रेणापि संभवान्मन्त्राम्नानमनर्थकमितिवाच्यम् मंत्रैरेव स्मर्तव्यमिति नियमविध्याश्र
यणात् नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको
विधिर्नियमविधिः ॥ यथाहुः ॥ विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्य
त्र च प्राप्तौ परिसंख्येति गीयते० अस्यार्थः ॥ प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपू
र्वविधिः यथा यजेत स्वर्गकाम इत्यादि स्वर्गोद्देशेन यागस्य प्रमाणान्तरेणाप्राप्तस्यानेन

फलोद्देशेन यागो विधीयते यागसामान्यस्याविधेयत्वात् यागविशेष एव विधीयते
तत्र कोऽसौ यागविशेष इत्यपेक्षायामुद्भिच्छब्दादुद्भिद्रूपो याग इति विज्ञायते॰ उद्भिदा या-
गेन पशुं भावयेदित्यत्र सामानाधिकरण्येन नामधेयान्वयात्॰ नामधेयत्वं चाभिमि-
तच्चतुष्टयात् मत्वर्थलक्षणाभयात् वाक्यभेदभयात् तत्प्रख्यशास्त्रात् तद्व्यपदे-
शादिति तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणा-
भयात् तथाहि न तावदनेन वाक्येन फलं प्रति यागविधाने प्रति च गुणविधानं युज्य-
ते वाक्यभेदापत्तेः उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्राप्तत्वात् गुणविशिष्ट गध
कर्मविधानं वाच्यम्॥ उद्भिद्वता यागेन पशुं भावयेदिति विशिष्टं पशुकाम इत्यत्र चित्रश-
ब्दस्य कर्मनामधेयत्वं वाक्यभेदभयात्। तथाहि न तावदत्र गुणविशिष्टयागविधानं संभवति।
दधिमधुपयोघृतं धानाउदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमित्यनेन गुणस्य विहितत्वात् हि शिष्ट
विधौ च मत्वर्थलक्षणा। स्तुतमेव चित्रया यजेत ३

सतिवैचेति तच्चात्र स्यैवावधारणीति। श्रौतीपरिसंख्या एवकारेणापवमानातिरिक्तस्तो
त्रव्यावृत्तेरभिधानात्। पंच पंचनखा भक्ष्या इति तु लाक्षणिकी। इतरनिवृत्तिवाच
कपदाभावात्। अत एवैषा त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिरश्रुतकल्पना प्राप्त
बाधश्चेति।। श्रुतस्य पंचनखभक्षणस्य हानात्। अश्रुतापंचनखभक्षणनिवृत्तेस्तत्क
ल्पनात्। प्राप्तस्य चापंचनखस्य भक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वयं
शब्दनिष्ठं प्राप्तबाधस्त्वर्थनिष्ठ इति दिक्।। येषां प्रयोगसमवेतार्थस्मारकत्वं न संभवति
तदुच्चारणस्यानन्यगत्या ऽदृष्टार्थकत्वं कल्प्यत इति नानर्थक्यमिति। नामधेयानां
च विधेयार्थपरिच्छेदकतयार्थवत्त्वम्।। तथाहि।। उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दो
यागनामधेयम्।। तेन विधेयार्थपरिच्छेदः क्रियते तथाहि।। अनेन वाक्येन प्राप्तत्वात्त

प०

मी-त्तो॰

६ याबाधः स्यात् मंत्रवर्णस्य चतुर्थीतो दुर्बलत्वात् पष्ठ्या हुः॥ नह्येते न चतुर्थ्यौ च मंत्रवर्णे
नवापुनर्देवतायाविधिस्तत्र दुर्बलं तु परपरमिति चेन्न पद्‌ग्नये च प्रजापतये च स्वाहेति जुहो
तीत्यत्र न केवलप्रजापतिविधाने किंतु मंत्रवर्णेन प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः
एवं चनैवाधः केवलप्रजापतिविधानाभावात् नचात्र समुच्चितोभयविधानमेव कथं ने
6 तिवाच्यम् समुच्चितोभयविधानापेक्षयाऽन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापति
मात्रविधाने लाघवात् एवं प्रयाजेषु समिधादिदेवतानां समिधः समिधोऽग्न आज्य
धं स्य व्यंत्विति त्यादिमंत्रवर्णेभ्यः प्राप्तत्वात् समिधो यजतीत्यादिषु समिधादिपदं स्त त्रस्य
शास्त्रान्तकर्मनामधेयमूध्येनेनाभिचरन् यजेतेत्यत्र श्येनशब्दः स्य कर्मनामधेयत्वम
तत्पदेशात् तेन व्यपदेशादुपमानात् तदन्यथानुपपत्तेरिति यावत् तथाहि विधिधेयंत
स्य ... स्तुतिर्भवति यच्चात्र श्येनोविधेयस्यान्नदार्थ्यादेस्तस्येवस्तुतिः कार्याय पावे

[illegible]

यागविधानानुपपत्तेः यागस्य फलसंबंधे गुणसंबंधे च विधीयमाने वाक्यभेदः तस्मादग्नि
होत्रशब्दः कर्म्मनामधेयम् तथा च विशिष्टयागेन पशुं भावयेदिति सामानाधिकरण्येनान्व
यान्न वाक्यभेदः प्रकृते तु इष्टेरनेकद्रव्यत्वेन विशिष्टशब्दवाच्यत्वोपपत्तिः अग्निहोत्रं जु
होत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्वम् तत्प्रख्यशास्त्रात् तस्य प्रख्यापकस्य वि
द्यमानत्वादग्निहोत्रशब्दः कर्मनामधेयमिति यावत् ननु अयं गुणविधिरेव कुतो नेति चेन्न यस्य
अग्नौ होत्रमस्मिन्निति सप्तमीसमाससमाश्रयणे होमाधारत्वेनाग्निरूपो गुणो विधेयस्तदा यदाहव
नीये जुहोतीत्यनेनैवाग्नेः प्राप्तत्वात् तद्विधानानर्थक्यं अग्नये होत्रमिति चतुर्थीसमाससमा
श्रयणे अग्निदेवतारूपगुणोऽनेन विधीयते इति चेन्न तद्देवतायाः शास्त्रान्तरेण प्राप्तत्वात्॥
किं तच्छास्त्रान्तरमिति चेत् यदग्नये च प्रजापतये च सायं जुहोतीति केचित्॥ अपरे तु अग्निर्ज्यो
तिरग्निः स्वाहेति मन्त्रवर्णादग्निरूपदेवताप्राप्तिः ननु अस्मिन्मन्त्रवर्णेऽकत्वे प्रजापतिदेवत

वा. लौ. विधिभिन्नेन नञा तात्पर्योपहितोऽभावपदार्थयोः तयोर्मध्ये कलञ्जं स्यात् न कलञ्जं भक्षयेत्

विधि

१७ स्य प्रवर्त्तकत्वनिर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वमाक्षिपन् पुरुषं तत्र प्रवर्त्तयति
तथा च न कलञ्जं भक्षयेदित्यादिनिषेधोऽपि निवर्त्तनां प्रतिपादयन् स्वनिवर्त्तकत्वनिर्वा
हार्थं निषेध्यस्य कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्त्तयति
ननु निषेधवाक्यस्य कथं निवर्त्तनाप्रतिपादकत्वमिति चेदुच्यते. नञस्तावदत्र धात्वर्थस्य
नञर्थेऽनन्वयः अव्यवधानेऽपि तैरस्य प्रत्ययार्थभावनोपसर्जनत्वेनोपस्थितेः नह्य
न्योपसर्जनत्वेनोपस्थितमन्यत्रान्वेति अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः
क्रियान्वयापत्तेः अतः प्रत्ययार्थस्यैव नञर्थेऽन्वयः तत्रापि नाख्यातत्वांशवाच्या
र्थभावनायाः तस्या लिङ्त्वांशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः किन्तु लिङ्त्वांशवा
च्यप्रवर्त्तनायाः तस्याः सर्वापेक्षया प्रधानत्वात् नञश्चैष स्वभावो यत्स्वसमभिव्या
हृतपदार्थविरोधिबोधकत्वम् यथा घटो नास्तीत्यादौ स्तीतिपदसमभिव्याहृतो नञ

श्येनो निपत्याद‍त्ते एवमयं द्विविधं तन्मात्रं अनिपत्यादत्त इत्युपमानार्थवादेन श्येनः स्तोतुं न श
क्यः श्येनोपमाने नार्थान्तरं स्तुतेः क्रियमाणत्वात् न च श्येनोपमानत्वेन स एव स्तोतुं शक्यः
उपमानोपमेयभावस्य भिन्ननिष्ठत्वात् यस्तु श्येन संज्ञको यागो विधीयते तदर्थवा
देन श्येनोपमाने तस्य स्तुतिः कर्तुं शक्यत इति श्येनशब्दः कर्मनामधेयं तद्व्यपदेशादिति
उत्पत्तिशिष्टगुणबलीयस्त्वमपि प्रत्युक्तं नामधेयनिमित्तमिति केचित् यथा वैश्वदेवे
न यजेतेत्यादौ अत्रोत्पत्तिशिष्टास्यादीनां बलीयस्त्वाद्वैश्वदेवशब्दस्य विश्वेदेवदेवता
विधायकत्वं न संभवतीति कर्मनामधेयत्वं वस्तुतस्तु तत्प्रख्यशास्त्राद्वास्य कर्मनामधेयत्वं
प्रकृतयागे विश्वेदेवरूपगुणसंप्रतिपन्नस्य शास्त्रस्यार्थवादरूपस्यैव सत्त्वात् यद्विश्वेदेवाः स
मयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वं पुरुषस्यानिवर्तकत्वात्कोऽनिषेधः निषेधवाक्यानामनर्थ
हेतुक्रियानिवृत्ति [illegible] तथाहि यथा विधिः प्रवर्तनां प्रतिपादयन्॥

नी.लौ०

१८ रोध्यनीक्षणसंकल्पएवलक्ष्यैयाप्रतिकार्यते ॥ तस्यकर्त्तव्यत्वसंभवात्‌ आदित्यविषयकावी
क्षणसंकल्पेनभावयेदितिवाक्यार्थः तत्रभाव्याकांक्षायामेतावताहेतुसाविप्रक्तोभयतीतिवा
क्यशेषावगतफलपक्षयोभाव्यत्वमाप्नोति· एवंचपूर्वोत्तरयोरेकवाक्यत्वंनिर्वहत्येवनत्वत्रधा
त्वर्थविरोधिनः पदार्थान्तरस्यापिसंभवोत्के ... यमनीक्षणसंकल्पस्यैवभावनान्वयइतिभा
व्यम्‌ ॥ तस्यवर्जितविनाभावेनप्रकृतेभावनान्वययोग्यत्वात्‌ द्वितीयंयजतिषुयेयजामहं
करोतिनानुयाजेष्वित्यादौ अत्रविकल्पप्रसक्तेश्चपर्युदासाश्रयणात्‌· तथाहि· यद्यत्र
वाक्येनञर्थेप्रत्ययार्थान्वयः स्यात्तदानुयाजेषुयेयजामहइतिमंत्रस्यप्रतिषेधः स्यात्‌ अनु
याजेषुयेयजामहंनकुर्यादिति सच्चप्राप्तिपूर्वकएवप्राप्तस्यैवप्रतिषेधात्‌ प्राप्तिश्चयजतिषुयेय
जामहंकरोतीतिशास्त्रादेववाच्याशास्त्रप्राप्तस्यचप्रतिषेधेविकल्पएवनतुवाधः । प्राप्तिमू
लरागस्यैवशास्त्रस्यशास्त्रान्तरेणवाधायोगात्‌· नत्वपरेजुहोतीतिविशेषशास्त्रेणाहवनी
येजुहोतीतिशास्त्रस्यैवनानुयाजेविधानेनयजतिषुयेयजामहंकरोतीत्यस्यवाधःस्यादितिवाच्यं

प्रत्यक्षत्वविरोधि प्रत्यक्षत्वं गमयति तदिह लिङः समभिव्याहृतो नञ् । लिङ्पदप्रवर्त्तनावि-
रोधिनीं निवर्त्तनामेव बोधयति । विधिवाक्यश्रवणे हि मां प्रवर्त्तयतीति प्रवर्त्तनाप्रतीतिः निषे-
धवाक्यश्रवणे हि मां निवर्त्तयतीति निवृत्त्यनुकूलव्यापारप्रतीतेः तस्मान्निषेधवाक्यस्थले
निवर्त्तनैव वाक्यार्थः यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः तच्च
बाधकं द्विविधं तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च तत्राद्यं नेक्षेतोद्यन्तमादित्यमित्यादौ तस्य
व्रतमित्युपक्रमस्यैव वाक्यपाठात् तथा चात्र पर्युदासाश्रयणं तथा हि नञः स्वकर्त्तव्यार्थे रूढत्वा-
त्तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वेनोपक्रमात् किं तत्कर्त्तव्यमित्याकांक्षायां नेक्षेतोद्य-
न्तमादित्यमित्यादिना कर्त्तव्यार्थ एव प्रतिपादनीयः अन्यथा पूर्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात्
तथा च नञर्थेन प्रत्ययार्थान्वयः कर्त्तव्यार्थानन्वयबोधात् विध्यर्थप्रवर्त्तनाविरोधिनिवर्त्तनाया
एवानन्वयान्नञो बोधनात् तस्मात्कर्त्तव्यार्थत्वाभावात् तस्मान्नेक्षेतेत्यत्र नञ्साधात्वर्थवि

ना.लौ.

१५

रोहितन्मात्रसंकोचार्थः ॥ यथा पुरोडाशं चतुर्द्धा करोतीति सामान्यप्राप्तं चतुर्द्धाकरणं आग्ने
यं चतुर्द्धा करोतीति निविशेषात् आग्नेयपुरोडाशमात्रे संकोच्यते पर्युदासस्तु तदन्यमा
त्रसंकोचार्थ इति न तोभेदात् कुत्रचिद्विकल्पप्रसक्तावप्यन्यगत्या प्रतिषेधाश्रयणं यथा
नातिरात्रे षोडशिनं गृह्णातीत्यादौ अत्र हि अतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तषो
डशिग्रहणस्य निषेधाद्विकल्पप्रसक्तावपि न पर्युदासाश्रयणम् असंभवात् तथा हि य
७ द्यत्र षोडशिपदार्थे नञर्थान्वयस्तदातिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थबो
धः स्यात् स च न संभवति अतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधात् यदि चाति
रात्रपदार्थे नान्वयस्तदातिरात्रव्यतिरिक्ते षोडशिनं गृह्णातीति वाक्यार्थबोधः स्यात् सोपि न संभ
वति तद्विधिविरोधात् ॥ अतो नानन्यगत्या प्राप्तस्य शास्त्रप्राप्तषोडशिग्रहणस्यैव निषेधः ॥ न च वि
कल्पप्रसक्तिः तस्याप्यपेक्षणीयत्वात् इयांस्तु विशेषः यद्विकल्पादेके प्रतिषेधेपि प्रतिषिध्यमानस्य
नानर्थहेतुत्वं विधि [illegible] राग तएव प्रति

[illegible] ये यजामहे [illegible] उपां° ८

परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात् ॥ यदशास्त्रस्य हि स्वविधानार्थमात्मनीयशा
स्त्रान्तरापेक्षणान्निरपेक्षत्वम् ॥ प्रकृते तु निषेधशास्त्रस्य निषेध्यसमर्पकाय सर्वं यजतिषु ये य
जामहे स्वात्मलाभाय तदपेक्षणान्न निरपेक्षत्वम् ॥ तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे वि
कल्प एव स च न युक्तः विकल्पे शास्त्रस्य पाक्षिकाप्रामाण्यप्रसङ्गात् ॥ न ह्यननुयाजेषु ये यजा
10 महे इति शास्त्रानुष्ठाने नानुयाजेष्विति शास्त्रस्य प्रामाण्यं संभवति · व्रीहियवानुष्ठाने यवशास्त्रस्येव
हि रद्धः यत्कल्पनाच्च स्यात् · विधिप्रतिषेधयोरपि पुरुषार्थत्वात् अतो नात्र प्रतिषेधस्याश्रय
णं किन्तु नञानुयाजेषु ये यजामहे इति मन्त्रस्य [illegible] वाक्यार्थबोधः नञोऽनुयाजव्यतिरिक्तेलाक्ष
णिकत्वात् · एवं च न विकल्पः अत्र च वाक्ये ये यजामहे इति न विधीयते यजतिषु ये यजामहे
रूपेणैव प्राप्तत्वात् ॥ किन्तु सामान्यशास्त्रप्राप्ते ये यजामहे इत्यनुवादेन तस्यानुयाजव्यतिरिक्त
विषयकत्वं विधीयते · यत् यजतिषु ये यजामहं करोति तत् अनुयाजव्यतिरिक्तेष्वेवेति · नन्वे
वं सामान्यशास्त्रस्य विशेष [illegible] स्यादिति चेन्न ॥ उपसंहा